

# Sri Kartikeya Stuti – Shiva Mahapuranam

## ॥ श्री कार्तिकेय स्तुतिः - शिव पुराणम् ॥

The following is a rare hymn on **Lord Kartikeya** from **Shiva Mahapuranam**, **Rudra Samhita**, **Kumara Khanda**, **Chapter 6**. The **Kumara Khanda** contains the story of the incarnation of **Lord Kartikeya** to alleviate the tribulations of Devas. The following hymn was created by **Vipra** requesting **Lord Kartikeya** to protect the Yajna to be performed by them. The following hymn extols Lord Kartikeya as all-pervading, omnipotent and all Supreme and requesting the fulfillment of Vipra's wish.

विप्र उवाच -

सर्व ब्रह्माण्ड नाथं हि सर्वाऽमर सुसेवितम् ॥ १ ॥
दीनबन्धुर् दयासिन्धुः सुसेव्यो भक्त वत्सलः ।

हरि ब्रह्मादि देवैश् च सुस्तुतः परमेश्वरः ॥ २ ॥

पार्वती नन्दनः स्कन्दः परमेकः परन्तपः ।
परमात्मा ऽऽ त्मदः स्वामी सतां च शरणार्थिनाम् ॥ ३ ॥

दीनानाथ महेश शङ्कर सुत त्रैलोक्य नाथ प्रभो
मायाधीश समागतोऽस्मि शरणं मां पाहि विप्रप्रिय ।
त्वं सर्व प्रभुर् आनता ऽ खिल विद ब्रह्मादि देवैः स्तुतस् त्वं
मायाकृतिर् आत्म भक्त सुखदो रक्षापरो मायिकः ॥ ४ ॥

भक्त प्राण गुणाकरस् त्रिगुणतो भिन्नोऽसि शंभु प्रियः
शंभुः शंभुतनुः प्रसन्न सुखदः सच्चित् स्वरूपो महान् ।
सर्वज्ञस् त्रिपुरघ्न शङ्कर सुतः सत्प्रेम वश्यः सदा
षड्वक्त्रः प्रिय साधुरानत प्रियः सर्वेश्वरः शङ्करः ।
साधु द्रोहकरघ्न शङ्कर गुरो ब्रह्माण्ड नाथः प्रभुः
सर्वेषां अमरादि सेवित पदो मां पाहि सेवाप्रिय ॥ ५ ॥

वैरि भयङ्कर शङ्कर जन शरणस्य वन्दे तव पद पद्मं सुख करणस्य ।
विज्ञप्तिं मम कर्णे स्कन्द निधेहि निज भक्तिं जन चेतसि सदा विधेहि ॥ ६ ॥

करोति किं तस्य बली विपक्षो दक्षोऽपि पक्षो ऽ भय पार्श्व गुप्तः ।
किन्तक्षको ऽ प्यामिष भक्षको वा त्वं रक्षको यस्य सदक्षमानः ॥ ७ ॥

विबुध गुरुरपि त्वां स्तोतुं ईशो न हि स्यात्
कथय कथमहं स्यां मन्द बुद्धिर् वरार्च्यः ।
शुचिरशुचिर नार्यो यादृशस्तादृशो वा
पद कमलपरागं स्कन्द ते प्रार्थयामि ॥ ८ ॥

हे सर्वेश्वर भक्त वत्सल कृपासिन्धो त्वदीयोऽस्म्यहं
भृत्यः स्वस्य न सेवकस्य गणपस्यागः शतं सत्प्रभो ।
भक्तिं क्वापि कृतां मनागपि विभो जानासि भृत्याऽर्तिहा
त्वत्तो नास्त्यपरो ऽ विता न भगवन् मत्तो नरः पामरः ॥ ९ ॥

कल्याणकर्ता कलि कल्मषघ्नः कुबेर बन्धुः करुणार्द्र चित्तः
त्रिषट्क नेत्रो रस वक्त्र शोभी यज्ञं प्रपूर्णं कुरु मे गुह त्वम् ॥ १० ॥

रक्षकस् त्वं त्रिलोकस्य शरणागत वत्सलः ।
यज्ञकर्ता यज्ञभर्ता हरसे विघ्नकारिणाम् ॥ ११ ॥

विघ्न वारण साधूनां सर्ग कारण सर्वतः ।
पूर्णं कुरु ममेशान सुत यज्ञं नमोऽस्तु ते ॥ १२ ॥

सर्व त्राता स्कन्द हि त्वं सर्व ज्ञाता त्वमेव हि ।
सर्वेश्वरस् त्वं ईशानो निवेश सकलावनः ॥ १३ ॥

सङ्गीतज्ञस् त्वमेवासि वेदविज्ञः परः प्रभुः ।
सर्वस् तथा विधाता त्वं देवदेवः सतां गतिः ॥ १४ ॥

भवानी नन्दनः शंभु तनयो वयुनः स्वराट् ।
ध्याता ध्येयः पितृणां हि पिता योनिः सदात्मनाम् ॥ १५ ॥

---

**॥ इति श्रीशिव महापुराणे रुद्र संहितायां कुमार खण्डे श्रीकार्तिकेय स्तोत्रं सम्पूर्णम् ॥**